रथवदयोश्च । (१०२/१०२८)

रथ वद इत्येतयोश्चोत्तरपदयोः कोः कत् इत्ययमादेशो भवति । कद्रथः । कद्वदः ॥

तृणे च जातौ । (१०३/१०२९)

तृणशब्दे उत्तरपदे जातावभिधेयायां कोः कत् इत्यादेशो भवति । कत्तृणा नाम जातिः । जातौ इति किम् ? कुत्सितानि तृणानि कुतृणानि ॥

का पथ्यक्षयोः । (१०४/१०३०)

पथिन् अक्ष इत्येतयोरुत्तरपदयोः कोः का इत्ययमादेशो भवति । [1]कापथः । काक्षः ॥

ईषदर्थे च । (१०५/१०३१)

ईषदर्थे वर्तमानस्य कोः का इत्ययमादेशो भवति । कामधुरम् । कालवणम् । अजादावपि परत्वात् कादेश एव भवति । काम्लम् । कोष्णम् ॥

विभाषा पुरुषे । (१०६/१०३२)

पुरुषशब्दे उत्तरपदे विभाषा कोः का इत्ययमादेशो भवति । कापुरुषः, कुपुरुषः । अप्राप्तविभाषेयम् । ईषदर्थे तु [2]पूर्वविप्रतिषेधेन नित्यं का भवति । ईषत् पुरुषः कापुरुषः ॥

कवञ्चोष्णे । (१०७/१०३३)

उष्णशब्दे उत्तरपदे कोः कवम् इत्ययमादेशो भवति, का च विभाषा । कवोष्णम्, कोष्णम्, कदुष्णम् ॥

पथि च च्छन्दसि । (१०८/३६३०)

पथिशब्दे उत्तरपदे छन्दसि विषये कोः [3]कवम् का इत्येतावादेशौ भवतो विभाषा । कवपथः, कापथः, कुपथः ॥

---

1. कुत्सितः पन्थाः इत्यधिकम् फ. 2. पूर्वविप्रतिषेधे फ, पूर्वपूर्वविप्रतिषेधेन क. 3. कवङ इत्ययमादेशः, का च विभाषा क.ह.